दरत्, [द्] स्त्री, (दृणातीति । दृ विदारणे + "शृदृभसोऽदि: ।" उणा० । १ । १२६ । इति अदि: ।) प्रपात: । भयम् । पर्व्वत: । इति मेदिनी । दे, ३० ॥ म्लेच्छजाति: । इति लिङ्गादिसंग्रहे अमर: ॥ (देशविशेष: । यथा, राजतरङ्गिण्याम् । १५७ ।
"दरत्तुरुष्काधिपयोर्य: केशरिवराहयो: ।
हिमवद्विन्ध्ययोरासीदार्य्यावर्त्त इवान्तरे ॥")
कूलम् । तीरम् । इति सिद्धान्तकौमुद्यामुणादिवृत्ति: ॥

दरदं, क्ली, (दर ईषत् दायति शुध्यतीति । दै + क: ।) हिङ्गुलम् । इति राजनिर्घण्ट: ॥ (क्वचित् पुंलिङ्गेऽपि दृश्यते । अस्य पर्य्यायो यथा,—
"रक्तं मर्कटशीर्षञ्च हिङ्गुलं दरदो रस: ॥"
इति वैद्यकरत्नमालायाम् ॥
पर्य्यायान्तरं यथा,—
"हिङ्गुलन्दरदं म्लेच्छं चित्राङ्गञ्चूर्णपारदम् ।
दरदस्त्रिविध: प्रोक्तश्चर्म्मार: शुकतुण्डक: ॥
हंसपादस्तृतीय: स्याद्गुणवानुत्तरोत्तरम् ।
चर्म्मार: शुक्लवर्ण: स्यात् सपीत: शुकतुण्डक: ॥
जवाकुसुमसङ्काशो हंसपादो महोत्तम: ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"दरदं तण्डुलस्थूलं कृत्वा मृत्पात्रके त्रिदिनम् ।
भाव्यं जम्बीररसैश्चाङ्गेर्य्या वा रसैर्बहुधा ॥
ततश्च जम्बीरवारिणा चाङ्गेर्य्या रसेन परिप्लुतम् ।
कृत्वा स्थालीमध्ये निधाय तदुपरि कठिनीष्टम् ॥
चारु शरावं तत्र त्रिंशद्वारं जलं देयं उष्णो देयं
तथैव तदूर्द्धपातनेन निर्म्मलं शिवज: ॥"
"हिङ्गुले हिङ्गुलुर्याति दरद: शुकतुण्डक: ।
रसगन्धकसम्भूतो हिङ्गुलो दैत्यरक्तक: ॥
अम्लवर्गद्रवै: पिष्ट्वा दरदो माहिषेण च ।
दुग्धेन सप्तधा पिष्ट: शुष्कीभूतो विशुध्यति ॥
अन्यच्च ।
मेषीदुग्धेन दरदमम्लवर्गैर्विभावितम् ।
सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितम् ॥
अन्यमतम् ।
दरदं दोलिकायन्त्रे पक्वं जम्बीरजैर्द्रवै: ।
सप्तवारमजाक्षीरैर्भावितं शुद्धिमेति हि ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

दरद:, पुं, (दरं भयं ददातीति । दा + क: ।) देशविशेष: । भयम् । म्लेच्छजातिभेद: । इति शब्दरत्नावली ॥ (अयन्तु पूर्व्वं क्षत्त्रिय आसीत् पश्चात् क्रमश: उपनयनादिक्रियालोपात् शूद्रत्वादिकं प्राप्त: । यदुक्तं मनौ । १० । ४३-४४ ।
"शनकैस्तु क्रियालोपादिमा: क्षत्त्रियजातय: ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥
पौण्ड्रकाश्चौड्रद्रविडा: काम्बोजा यवना: शका: ।
पारदा पह्लवाश्चीना: किराता दरदा: खशा: ॥")

दरि:, स्त्री, (दृ + इन् ।) दरी । इति शब्दरत्नावली ॥ (तक्षककुलोत्पन्ने सर्पे, पुं । इति महाभारतम् ॥)

दरित:, त्रि, (दरो भयमस्य सञ्जात: । दर + तारकादित्वात् इतच् ।) भीत: । इति हेमचन्द्र: । ३ । २६ ॥

दरिद्र:, पुं, (दरिद्राति दुर्गच्छतीति । दरिद्रा + अच् ।) निर्धन: । तत्पर्य्याय: । निस्व: २ दुर्विध: ३ दीन: ४ दुर्गत: ५ । इत्यमर: । ३।१। १२ ॥ कीकट: ६ दुस्थ: ७ । इति जटाधर: ॥ अस्तमित: ८ । इति दानधर्म्म: । तस्य कारणं यथा,—
"अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च ।
अदत्त्वा हेमधेनूश्च दरिद्रो जायते नर: ॥"
इति पाद्मे भूखण्डम् ॥
"दरिद्रो यस्त्वसन्तुष्ट: कृपणो योऽजितेन्द्रिय: ॥"
इति श्रीभागवतम् ॥

दरिद्रा, च लु दुर्गत्याम् । इति कविकल्पद्रुम: ॥ (अदा०-पर०-अक०-सेट् ।) दुर्गतिरकिञ्चनीभाव: । च लु, उपर्य्युपरि पश्यन्त: सर्व्व एव दरिद्रति । इति दुर्गादास: ॥

दरिद्रायक:, त्रि, (दरिद्रातीति । दरिद्रा + ण्वुल् ।) दरिद्र: । इति मुग्धबोधम् ॥

दरिद्रित:, त्रि, (दरिद्रा + कर्त्तरि क्त: ।) दरिद्र: । दारिद्र्ययुक्त: ॥

दरिद्रिता, [ऋ] त्रि, (दरिद्रा + तृच् ।) दरिद्रायक: । दरिद्राधातो: कर्त्तरि तृन्प्रत्यय: ॥

दरोदरं, क्ली, (दरो भयं तज्जनकं उदरं यस्य । प्रायश: सर्व्वस्वासकत्वादेवास्य तथात्वम् ।) दुरोदरम् । इत्यमरटीकायां भरत: ॥

दरोदर:, पुं, (दरजनकमुदरं यस्य ।) दुरोदर: । इत्यमरटीकायां भरत: ॥ (यथा, उणादिवृत्तटीकायां उज्ज्वलदत्तधृतगोवर्द्धन: । ५ । १६ ।
"आश्रित्य दुर्गं गिरिकन्दरोदरं
क्रीड़न्त्यमुष्मिन् सततं दरोदरम् ॥")

दर्द्दर:, पुं, पर्व्वत: । (यथा, रामायणे । २ । ६१ । २४ ।
"मलयं दर्द्दरञ्चैव तत: स्वेदनुदो निल: ॥"
क्वचित् दर्दुरोऽपि पाठ: ॥) ईषद्भग्नभाजने, त्रि । इति मेदिनी । रे, १६६ ॥

दर्द्दराख्य:, पुं, अञ्जनविशेष: । तत्पर्य्याय: । मीनाक्षीय: २ । इति शब्दमाला ॥

दर्द्दरीकं, क्ली, (दारयतीव कर्णौ । दृ + णिच् + "फर्फरीकादयश्च ।" उणा० । ४ । २० । इति ईकन्प्रत्ययेन साधु: ।) वाद्यम् । इत्युणादिकोष: ॥

दर्द्दरीक:, पुं, (दारयतीव कर्णौ इति । दृ + णिच् + "फर्फरीकादयश्च ।" उणा० । ४ । २० । इति ईकन्प्रत्ययेन साधु: ।) मेघ: । वाद्यभेद: । भेक: । इति संक्षिप्तसारे उणादिवृत्ति: ॥

दर्द्दुरं, क्ली, ग्रामजालम् । इति मेदिनी । रे, १६७॥

दर्द्दुर:, पुं, (दृणाति कर्णौ शब्देनेति । दृ + "मकुरदर्द्दुरौ ।" उणा० । १ । ४१ । इति उरच् प्रत्ययेन निपातनात् साधु: ।) भेक: । इत्यमर: । १ । १० । २४ ॥ (यथा,—
"भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे ।
दर्द्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् ॥"
इत्युद्भट: ॥)
मेघ: । वाद्यभाण्डभेद: । पर्व्वतविशेष: । इति मेदिनी । रे, १६७ ॥ (यथा, रघौ । ४ । ५१ ।
"स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्या: शैलौ मलयदर्द्दुरौ ॥")
राक्षस: । इति संक्षिप्तसारे उणादिवृत्ति: ॥
(अभ्रकधातुभेद: । यथा, भावप्रकाशे ।
"पिनाकं दर्द्दुरं नागं वज्रञ्चेति चतुर्व्विधम् ॥"
"दर्द्दुरं त्वग्निनिक्षिप्तं कुरुते दर्द्दुरध्वनिम् ।
गोलकान् बहुश: कृत्वा स स्यान्मृत्युप्रदायक: ॥")

दर्द्दुरा, स्त्री, (दृणाति दारयति वा असुरानिति । दृ + उरच् प्रत्ययेन निपातनात् साधु: । ततष्टाप् ।) चण्डिका । इति मेदिनी । रे, १६८ ॥

दद्रु:, पुं, (दरिद्राति दुर्गच्छत्यङ्गमनेनेति । दरिद्रा + "दरिद्राते र्यालोप: ।" उणा० ।१।६०। इति कु: । रकारेकारयकाराणां लोपश्च ।) दद्रुरोग: । इति शब्दरत्नावली ॥

दद्रु:, पुं, (दरिद्रा + बाहुलकात् उ: । यालोपश्च ।) दद्रुरोग: । इत्युणादिकोष: ॥

दद्रुघ्न:, पुं, (दद्रुं हन्तीति । दद्रु + हन् + टक् ।) चक्रमर्द्दक: । इति शब्दरत्नावली ॥

दद्रुण:, त्रि, (दद्रुरस्यास्तीति । दद्रु + "लोमादिपामादिपिच्छादिभ्य: शनेलच: ।" ५।२।१०० । इति पामादिषु पाठात् न: । ततो णत्वञ्च ।) दद्रुरोगी । इत्यमरटीकायां भरत: ॥

दद्रू:, पुं, (दरिद्रा + ऊ: । यालोपश्च ।) दद्रुरोग: । इत्युणादिकोष: ॥

दद्रूण:, त्रि, (दद्रूरस्यास्तीति । दद्रू + न: ।) दद्रुरोगी । इत्यमरटीकायां भरत: ॥

दद्रुरोगी, [न्] त्रि, (दद्रुरोगोऽस्यास्तीति । दद्रुरोग + इनि: ।) दद्रुरोगी । इत्यमरटीकायां भरत: ॥

दर्प:, पुं, (दृप्यते इति । दृप् + भावे घञ् ।) उच्छृङ्खलत्वम् । इति नीलकण्ठ: । कस्तूरी । इति मेदिनी । पे, ७ ॥ उष्मा । इति त्रिकाण्डशेष: ॥ अहङ्कृति: । तत्पर्य्याय: । गर्व्व: २ अहङ्कार: ३ अवलिप्तता ४ अभिमान: ५ ममता ६ मान: ७ चित्तोन्नति: ८ स्मय: ९ । इति हेमचन्द्र: । २ । २३१ ॥ * ॥
"अहङ्कारश्च सर्व्वेषां पापबीजममङ्गलम् ।
ब्रह्माण्डेषु च सर्व्वेषां गर्व्वपर्य्यन्तमुन्नति: ॥
येषां येषां भवेद्दर्पो ब्रह्माण्डेषु परात्परे ।
विज्ञाय सर्व्वं सर्व्वात्मा तेषां शास्ताहमेव च ॥
क्षुद्राणां महताञ्चैव येषां गर्व्वो भवेत् प्रिये ।
एवंविधमहं तेषां चूर्णीभूतं करोमि च ॥
चकार दर्पभङ्गञ्च महाविष्णो: पुरा विभु: ।
ब्रह्मणश्च तथा विष्णो: शेषस्य च शिवस्य च ॥
धर्म्मस्य च यमस्यापि शाक्रस्य चन्द्रसूर्य्ययो: ।
गरुड़स्य च वह्नेश्च गुरोर्दूर्व्वाससस्तथा ॥
दौवारिकस्य भक्तस्य जयस्य विजयस्य च ।